# संस्कृत-वार्ता:

दिनाङ्क : 11/12/2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- राज्यसभायां निर्वाचन-परिष्कार-विषये चर्चा भवति।
- पेट्रोल-यन्त्रेषु विंशति- प्रतिशतं इथेनाल इत्यस्य मिश्रणेन भारतस्य कार्बन्-डाई-आक्सायड-उत्सर्जने सपादसप्तशताधिक-लक्ष-मीट्रिक-टन परिमितं यावत् न्यूनीकृतम् इति केन्द्रीयमन्त्री नितिनगड्करीवर्यः अद्य लोकसभायां सूचितवान्।
- इण्डिगो-संस्था सद्यः एव विमानयानस्य बाधया प्रभावितानां यात्रिकाणां कृते क्षतिपूर्तिं अघोषयत्।
- पाकिस्तान्-देशस्य पूर्व-आई. एस. आई. प्रमुखाय फैज़-हमीद इत्यस्मै चतुर्दश-वर्षाणां कारावास-दण्डः दत्तः, येन देशस्य शक्ति-संरचनया सह वर्धमाना विक्षोभात्मिका स्थितिः उद्घाटिता अभवत्।
- अद्य सायङ्काले न्यू-चण्डीगढ-नगरे द्वितीयायां टी-20 इति क्रिकेट-क्रीडायां दक्षिण-अफ्रीका-देशेन सह भारतं क्रीडिष्यति।

------------------------------------------------------------

राज्यसभा-निर्वाचन-परिष्कारः

राज्यसभायां निर्वाचन-परिष्कारेति विषये चर्चा आरब्धा। दोषारोपणस्य आरम्भं कुर्वन्, काङ्ग्रेसदल-सदस्यः अजय माकनः, निर्वाचन-आयोगः मतदानकेन्द्रात् सी. सी. टी. वी. इत्यस्य दृश्यानि न प्रकाशयति इति आक्षेपम् आरोपितवान्। सः अवदत् यत् भारतं लोकतन्त्रस्य जननी अस्ति परम् विश्वसनीयतायाः हानिः लोकतान्त्रिकसंस्थानां दुर्बलतां जनयति इति सावधानं कृत्वा, निर्वाचन-आयोगः स्वकीयां विश्वसनीयतां पुनः स्थापयेत् इति। सः आरोपितवान् यत् गतवर्षस्य लोकसभा-निर्वाचनात् पूर्वमेव काङ्ग्रेस-दलस्य वित्तलेखाः आयकर-विवरणपत्राणां पूरणे विलम्बतेति कारणेन स्थिरीकृताः आसन्। चर्चायां भागम् गृह्णन् भाजपा-नेता सुधांशु-

त्रिवेदी अवदत् यत् काङ्ग्रेस्-पक्षस्य कार्यकाले निर्वाचन-परिष्कारेति विषये कदापि सम्यक् विचारः न अभवत्। श्रीत्रिवेदी अवदत् यत्, केवलं भारते एव सजीवः लोकतन्त्रः अस्ति। ई. वी. एम. विषये काङ्ग्रेस-पक्षस्य अभियोगान् अधिकृत्य सः अवदत् यत् ई. वी. एम. इतीदं राजीवगान्धी इत्यस्य काले प्रवर्तितम् आसीदिति।

---

**लोकसभा-इथेनॉलः**

केन्द्रीय-मार्ग-परिवहन-राजमार्ग-मन्त्री नितिन गडकरीः अवदत् यत् पेट्रोल-मध्ये विंशति-प्रतिशतं इथेनाल इत्यस्य मिश्रणेन भारतस्य कार्बन-डाई-ऑक्साईड इत्यस्य उत्सर्जनं षड्त्रिंशदुत्तरत्रिशत लक्ष-मीट्रिक-टन-परिमितं न्यूनीकृतम् भविष्यति। अद्य लोकसभायां प्रश्नोत्तरकाले अनुपूरक-प्रश्नानाम् उत्तरं ददन् श्रीगडकरीः अवदत् यत्, इथेनॉल हरित-ईन्धनम् अस्ति, येन प्रदूषणं न्यूनीभवति, कृषकाणां आयं वर्धयितुं च साहाय्यं भवति।

---

**इण्डिगो क्षतिपूर्तिः**

इण्डिगो इति संस्थया अस्य मासस्य त्रि-चतुर्-पञ्च दिनांकेषु विमानयानानां परिचालन-बाधायाः कारणात् प्रभावितेभ्यः ग्राहकेभ्यः दशसहस्र-रूप्यकाणां क्षतिपूर्ति-प्रदानस्य घोषणा कृताऽस्ति। इण्डिगो इत्यनेन उक्तं यत् एषः क्षतिपूर्तिराशिः यात्रा-वाउचर इति रूपेण प्रदीयते, यस्य उपयोगः आगामिषु द्वादश-मासेषु इण्डिगो-यात्रायां कर्तुं शक्यते।

---

**डी. जी. सी. ए. इण्डिगो**

नागरिक-उड्डयन-महानिदेशकः इण्डिगो-संस्थायाः वरिष्ठतमम् अधिकारिणं पीटर एल्बर्स इत्येनं अद्य अपराह्णे आहूतवान्। इतः पूर्वं नागरिक-उड्डयन-मन्त्री राममोहनः स्थिरीकरणस्य उपायानां समीक्षार्थं इण्डिगो-संस्थायाः शीर्षप्रबन्धनेन सह मेलनं कृतवानासीत्। सामाजिक-प्रसार-माध्यमे

श्रीनायडुः अवदत् यत् यात्रिकानां सङ्कटेषु यथासमयं समाधनार्थं नियमित-निरीक्षणं क्रियते इति।

---

## राष्ट्रपतिः-मणिपुरम्

राष्ट्रपतिः द्रौपदी-मुर्मुः अद्य मणिपुरस्य द्विदिवसीय-यात्रायाम् इम्फाल-नगरं सम्प्राप्तास्ति। यात्रावधौ सा राज्ये अनेकेसु औपचारिक-विकासात्मक-कार्यक्रमेषु भागं ग्रहीष्यति।

---

## जोशी-हाइड्रोजन कार

केन्द्रीयमन्त्री प्रह्लादजोशी अद्य हरित-ऊर्जायाः प्रचारार्थं हरित-हाइड्रोजन-शक्तियुक्त-कार-यानं नीत्वा संसद-भवनं प्राप्तवान्। प्रसारमाध्यमेन सह वार्तालापं कुर्वन् सः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदीवर्यस्य नेतृत्वे हरित-हाइड्रोजन-आन्दोलनस्य आरम्भः अभवत् इति। हरित-हाइड्रोजन-उत्पादनार्थं राष्ट्रिय-हरित-हाइड्रोजन-मिशन इत्यादयः उपक्रमाः आरब्धाः इति सः अवदत्। श्री जोशी वर्यः अवदत् यत् उत्पादनसम्बद्ध-प्रोत्साहन-योजनायाः माध्यमेन चतुर्विंशति-सहस्र-कोटिरूप्यकाणि विनियोजितानि सन्ति इति।

---

## पाक-पूर्व-आईएसआई अध्यक्षः

पाकिस्तान-देशस्य सैन्य-न्यायालयेन अद्य आई. एस. आई. इत्यस्य पूर्वप्रमुखाय फैज़ हमीद इत्यस्मै सैन्य-नियमानाम् उल्लङ्घनमुद्दिश्य चतुर्दशवर्षाणां कारावासदण्डः दत्तः।

---

## लोकसभा-गैस

केन्द्रीय पेट्रोलियम एवं प्राकृतिक गैस मंत्री हरदीप सिंह पुरिणा उक्तं यत् सर्वकारः अस्मै वित्तीयवर्षाय प्रधानमंत्री उज्ज्वला योजना इत्यन्तर्गतं लाभार्थिभ्यः द्विशतग्रामोत्तर-चतुर्दश किलोग्रामभारयुतस्य LPG इति वातेन्धन-भाण्डे त्रिशतरूप्यकाणां लक्षित सब्सिडी इति अनुदानं प्रददन्नस्ति। लोकसभायां प्रश्नोत्तरकाले प्रत्युत्तरं ददन् श्रीहरदीपसिंहः अवदत् यत् अनुदानं प्रतिवर्षं नवपरिमिताय पुनः पूरणाय प्रवर्तयिष्यति।

------------------------------------------------------------

## वास्तविकता परीक्षणं-लेबर कोड्स इति

नूतन-श्रम-संहितान्तर्गतं उद्योग-स्वामिनः कर्मकरान् द्वादश-घण्टाः यावत् स्थातुं बाध्यं करिष्यन्ति, परन्तु केवलं अष्ट घण्टानामेव श्रमदेयं दास्यन्ति इति सामाजिक-माध्यमेषु प्रसारितं वीडियो-चित्रं सर्वकारः निरासयत्।

------------------------------------------------------------

## एम. ई. ए. गोवा अग्निः

विदेशमन्त्रालयः गोवा-नाईट-क्लब इत्यस्य सह-स्वामिने गौरव-लूथरा अथ सौरभ-लूथरा इत्येतयोः पारग-पत्राणां निरसनस्य विषये विचारं कुर्वन्नस्ति, यत्र अग्निप्रमादेन पञ्चविंशति जनाः मृताः। गोवा-सर्वकारात् गौरव-लूथरा सौरभ-लूथरा चेत्येतयोः विषये मन्त्रालयेन सूचना प्राप्ता इति सूत्रैः सूचितमस्ति।

------------------------------------------------------------

## क्रिकेट-भारत टी-20

पुरुष-क्रिकेट-क्रीडायां अद्य न्यू-चण्डीगढ इति नगरस्य मुल्लाँपुरस्थे महाराजा यादविन्द्रसिंह-अन्ताराष्ट्रिय-क्रिकेट-क्रीडाङ्गणे श्रृङ्खलायाः द्वितीयायां टी-20 इति-क्रीडायां भारतं दक्षिण-अफ्रीकादेशं सम्मुखी-करोति। भारतीयसमयानुसारं सायं सप्त-वादने क्रीडा आरप्स्यते।

।। इति वार्ता: ।।